# Bhavalinga Mahimanuvarnanam

# ભાવલિઙ્ગમહિમાનુવર્ણનમ્

## Document Information

Text title : Bhavalinga Mahimanuvarnanam

File name : bhAvalingamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 36| 181-206 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ભાવલિઙ્ગમહિમાનુવર્ણનમ્

શ્રીમન્નિર્મલભાવલિઙ્ગમમરારાધ્યં પ્રસન્નં સદા
પૂજ્યં મત્કુલસમ્ભવૈરનુદિનં ત્યક્ત્વાઽન્યદેવાર્ચનમ્ ।
એવં શઙ્કરશાસનં ચ ન સમુલ્લઙ્ઘ્યં શિવાસંયુતઃ
શમ્ભુર્નૃત્યતિ લિઙ્ગમેતદમલં દૃષ્ટ્વા સુરાભીષ્ટદઃ ॥ ૧॥

એતદ્દર્શનમાત્રતોઽપિ સકલાભીષ્ટામ્બુરાશિઃ સ્વયં
નિત્યં સ્વાઙ્ગણમેત્ય ભાવલલિતં લિઙ્ગં પ્રપશ્યત્યયમ્ ।
સ્વામિન્ અસ્ય વશે વસામિ તવ ચેદાજ્ઞા ત્વદારાધકં
ત્યક્ત્વાઽન્યત્ર ન સંવસામિ શપથઃ શમ્ભો ત્વદઙ્ઘ્ર્યમ્બુજે ॥ ૨॥

ત્વત્પાદામ્બુરુહં વિહાય ન કદાપ્યન્યત્ર ગન્તું મતિઃ
શમ્ભો નિર્મલભાવલિઙ્ગસદૃશં લિઙ્ગં ક્વ વા ભૂતલે ।
પાતાલેઽપિ ન મન્દરેઽપિ સુતરાં મેરૌ મહેશાલયે
સત્યં સત્યમિદં પુનઃ પુનરિન્દં સન્દેહવાર્તાઽપિ ન ॥ ૩॥

કલ્યાણાનિ પદે પદે સુખમપિ સ્વામિંસ્ત્વદારાધને
સિદ્ધાનામપિ સિદ્ધિદં બહુવિધાભીષ્ટપ્રદાનોન્મુખમ્ ।
નિત્યં શઙ્કરભાવાલિઙ્ગમધુના સિદ્ધિપ્રદં જાતમ-
પ્યગ્રે સિદ્ધિકરં કરોતિ સતતં સિદ્ધિપ્રસિદ્ધિં પ્રભો ॥ ૪॥

શેષાશેષફણામણિસ્ફુરદુરુ શ્રીકણ્ઠકણ્ઠ પ્રભો
ગઙ્ગા તુઙ્ગતરઙ્ગતિ ક્વચિદયં લિઙ્ગૈકદેશે પુનઃ ।
આનીલા યમુના તરઙ્ગતિ પુનઃ સા વાક્ તરઙ્ગત્યહો
સા વાચાં વિષયો ભવત્યપિ કથં શ્રીનીલકણ્ઠ પ્રભો ॥ ૫॥

લિઙ્ગ મઙ્ગલદં મનોરથતતિં તાવત્ તનોત્યાદરાત્
આદૌ દૃષ્ટમદૃષ્ટભેદજનકં સૃષ્ટં વિસૃષ્ટં ફલમ્ ।
તદ્ભક્તપ્રણતં પ્રપશ્યતિ મુહુઃ ચિન્તાસમાલિઙ્ગિતં
ધ્યાતં પૂજિતમપ્યનન્યસદૃશં દેયં કિમસ્તીત્યપિ ॥ ૬॥

અન્યાલોકનદૂનમસ્ય નયનામ્ભોજં મદાલોકન-
  પ્રેમાવિષ્કરણપ્રભાકરસમુત્ફુલ્લં કિમસ્મૈ મયા ।
દાતવ્યં ભુવનત્રયેઽપિ ન તથા ભૂતં ફલં દૃશ્યતે
  ધર્માદ્યર્થચતુષ્ટયાન્યદધિકં દેયં ન દૃષ્ટં ફલમ્ ॥ ૭॥

શાઠ્યેનાપ્યથ માયયાપિ સકૃદપ્યાલોકિતં દૈવતં
  સર્વાભીષ્ટફલપ્રદત્વમભવત્ યદ્ભાવલિઙ્ગસ્ય મે ।
તસ્યૈતસ્ય કિમસ્તિ દેયમસકૃત્ સાનન્દમાલોકને
  શૈવાયેત્યતિચિન્તયા પરમિદં કાલં નયત્યન્વહમ્ ॥ ૮॥

યઃ પશ્યત્યસકૃન્મુદા પરમિદં મે ભાવલિઙ્ગં પ્રગે
  ભક્ત્યા તદ્વશતામુપેત્ય નિવસામ્યન્યન્ન કૃત્યં ચ મે ।
તસ્યાસ્મિન્નધમર્ણતામુપગતે મય્યપ્યદેયે સ કિં
  કર્તું પારયતીતિ પાપવિમુખશ્ચિન્તાબ્ધિમધ્યં ગતઃ ॥ ૯॥

ધર્માદ્યર્થચતુષ્ટયાધિકફલાપેક્ષા ન ભક્તસ્ય મે
  યદ્યપ્યસ્તિ તથાપ્યનન્યસદૃશં કિં ન પ્રદેયં ફલમ્ ।
મત્પૂજાનિરતાય તન્મમ ન ચેત્ કિં દેયમિત્યન્વહં
  ચિન્તાસિદ્ધિસમૃદ્ધિરેવ બહુધા મત્પૂજનાભ્યુચ્ચયે ॥ ૧૦॥

યત્કિઞ્ચિજ્જલમલ્પમપ્યુપહૃતં ભક્ત્યા વિનાપ્યર્પિતં
  દાસ્યત્યેવ ફલાનિ નિર્મલજલૈરાસેચને કિં ફલમ્ ।
દેયં કોમલબિલ્વપલ્લવનવામ્ભોજાદિભિઃ પૂજને
  કિંવા દેયમિતિ પ્રશાન્તિરહિતા ચિન્તા ન જાતાપિ કિમ્ ॥ ૧૧॥

કિઞ્ચિચ્ચેદ્ અપરિષ્કૃતાન્નમપિ મે દદ્યાત્ તદા તત્ફલં
  સ્યાદસ્યાન્નપતિત્વમુત્તમમધુક્ષીરાજ્યદધ્યન્નદઃ ।
મહ્યં કિં ફલમાપ્નુયાદિતિ ન કિં ચિન્તાઽપિ મે જાયતે
  જાતા વૃદ્ધિપરમ્પરામુપગતા સદ્ભાવલિઙ્ગસ્ય મે ॥ ૧૨॥

દિવ્યૈઃ કુઙ્કુમકેસરૈર્મૃગમદૈઃ કર્પૂરખણ્ડૈર્નવૈઃ
  અન્યૈરપ્યતિગન્ધસુન્દરર નદ્રવ્યૈઃ યુતં ચન્દનૈઃ ।
દત્તં ચેત્ તુહિનાન્વિતં મયિ તદા દેયં મયા કિં ફલં
  શૈવાયેતિ વિચારસાગરમહાકલ્લોલમાલાકુલઃ ॥ ૧૩॥

યો નિત્યં નવપટ્ટકૂલવપનૈઃ ધૂપૈઃ પ્રદીપૈર્મુહુઃ

માણિક્યાભરણાર્પણેન વિલસચ્છત્રસ્તથા ચામરૈઃ ।
આદર્શૈઃ ધ્વજસંયુતૈરપિ મહાપૂજાં કરોત્યાદરાત્
તસ્મૈ કિં મમ દેયમિત્યનુદિનં ચિન્તા નિરન્તા ન કિમ્ ॥ ૧૪॥

યો ભક્ત્યા પ્રણતો નિધાય ધરણીપૃષ્ઠે શિરઃ સાદરં
તં દેવાઃ પ્રણમન્તિ તાવદસકૃત્ દણ્ડપ્રણામોદ્યતાઃ ।
કિં તાવત્ફલમાપ્નુયાદિતિ ન કિં ચિન્તાઽપિ મે જાયતે
ગન્ધાધિષ્ઠિતભાવલિઙ્ગનિલયે વેદપ્રમેયે મયિ ॥ ૧૫॥

યો ભક્ત્યા નિયતઃ પ્રદોષસમયે પઞ્ચામૃતૈર્નિર્મલૈઃ
નીરૈરપ્યભિષિચ્ય વસ્ત્રવિમલશ્રીચન્દનાલેપનૈઃ ।
પુષ્પૈશ્ચમ્પકમાલિકાભિરભિતઃ શ્રીભાવલિઙ્ગાર્ચનં
કૃત્વા નૃત્યતિ તન્મનસ્યનુદિનં વૃત્તિર્હિ મે ચિન્તયા ॥ ૧૬॥

રુદ્રાધ્યાયસહસ્રનામપઠનૈઃ મત્સન્નિધાને નયેત્
યઃ કાલં સ વિભૂતિપૂતહૃદયો મુક્તો મહાપાતકૈઃ ।
સ્યાદિત્યત્ર કિમદ્ભુતં શિવમનુસ્મૃત્યાઽપિ તત્સન્નિધિં
યાસ્યત્યાપ્તતમત્વમેષ્યતિ ન સન્દેહોઽત્ર ચિત્રં ચ કિમ્ ॥ ૧૭॥

માં દ્રષ્ટું યદિ જાયતે મતિરપિ પ્રાતઃ પ્રમોદાન્વિતો
મુક્તઃ પાપગણૈરપારસુકૃતૈઃ યુક્તઃ સ માં પશ્યતિ ।
આધારઃ સુખસમ્પદામપિ ભવત્યાયુઃ પરં પ્રાપ્નુયાત્
આરોગ્યં નિગમાગમાદિવિહિતં શ્રીભાવલિઙ્ગાર્ચને ॥ ૧૮॥

યો મદ્ભક્તપદાર્ચકઃ સકૃદપિ પ્રાપ્નોતિ શૈવં પદં
મત્પૂજાનિરતો ભવેદ્યદિ તદા વક્તવ્યમત્રાસ્તિ કિમ્ ।
તસ્માદન્વહમર્ચનીયમમલં શ્રીભાવલિઙ્ગં ગણૈઃ
આરાધ્યં તદનન્યસક્તમનસા સન્ત્યજ્ય ધર્માન્તરમ્ ॥ ૧૯॥

કિં તૈરધ્વરકોટિભિર્બહુવિધદ્રવ્યાપહારોદ્યતૈઃ
દાનૈઃ સામપદક્રમાદિસહિતૈઃ કિં વેદપારાયણૈઃ ।
કિં યોગૈસ્તપસાઽપિ કિન્તુ સકૃદપ્યશ્રદ્ધયાઽપ્યર્ચિતં
દાસ્યત્યેવ હિ ભાવલિઙ્ગમમરાઃ પ્રાપ્યાતિભાગ્યાન્યપિ ॥ ૨૦॥

શ્રીમૃત્યુઞ્જય ભાવલિઙ્ગનિલયાપાયામયાનાં લયઃ
ત્વન્નામસ્મરણોદ્યમે સતિ પરં વૃત્તઃ પુનરતદ્ભયમ્ ।
ન સ્વપ્ને પ્રલયેસ્પિ નાપિ મરણેઽપ્યસ્યાન્તકાદ્વા ભયં

તેનેત્થં દૃઢનિશ્ચયે સતિ ફલં કિં નામસઙ્કીર્તને ॥ ૨૧॥

ભો શમ્ભો ભવ ભાવલિઙ્ગનિલય ત્વત્પૂજનોદ્યોગિનં
લક્ષ્મીસ્તાવદુપેત્ય કિં તવ મતં વાઞ્છાઽસ્તિ તે કુત્ર વા ।
અક્લેશાઙ્ગણરિઙ્ખણપ્રણતિભિઃ સ્થેયં મયા ત્વદ્ગૃહે
સ્વામિન્નિત્યપધાવતીતિ ભગવન્ કિં કિં ફલં પૂજને ॥ ૨૨॥

ત્વત્પૂજાનિરતાતિશાઙ્કરપુરદ્વારેષુ તાવત્ સુરાઃ
સાનન્દાઞ્જલિમસ્તકાઃ પ્રતિદિનં તદ્દર્શનાકાઙ્ક્ષયા ।
તિષ્ઠન્ત્યત્ર કિમદ્ભુતં ત્વયિ મહાદેવે પ્રસન્ને ફલં
કિં કિં નાસ્ય ભવિષ્યતિ પ્રતિદિનં શ્રીભાવલિઙ્ગાલયે ॥ ૨૩॥

આશાસ્યં મમ ભાવલિઙ્ગ સકલં સિદ્ધં ત્વદન્યાશ્રયં
વ્યાવૃત્તં યદિ માનસં તદિતિ તે ધ્યાનેન કિં પૂજયા ।
કિં વા ત્વત્પરિચર્યયાપિ ફલમિત્યસ્મિન્ વિચારે કૃતે
તાવવ્યાકુલતા ન તે ભવતુ સા ત્યાજ્યેતિ સમ્પ્રાર્થ્યતે ॥ ૨૪॥

એતાવદ્વદ ભાવલિઙ્ગનિલય સ્વામિન્ મમાદ્યાવધિ
ત્વત્પાદામ્બુરુહાન્યચિન્તનપરાવૃત્તં વિકારૈર્વિના ।
ચેતસ્તત્પુરુષાર્થભિન્નમપિ તે દેયં મમાસ્ત્વિત્યપિ
પ્રત્યાશા શિવપૂજનસ્ય ફલમસ્ત્યન્યન્મમ સ્યાદિતિ ॥ ૨૫॥

કિં નમ્રામરભૂરુહૈઃ નિજગૃહદ્વારાશ્રિતૈરાશ્રિતૈઃ
કિં ચિન્તામણિકામધેનુનિવહૈઃ કિં વા નિધીનાં ગણૈઃ ।
આકલ્પં કમલાપતિપ્રભૃતિભિઃ વૃન્દારકૈરાશ્રિતૈઃ
આનમ્રાઞ્જલિમસ્તકૈરનુદિનં શ્રીભાવલિઙ્ગાર્ચને ॥ ૨૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભાવલિઙ્ગમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૬। ૧૮૧-૨૦૬ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 36. 181-206 ..

Proofread by Ruma Dewan

*Bhavalinga Mahimanuvarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*